# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा एप्रिल् – २०१६

| | | |
|---|---|---|
| कक्षा- आचार्यः - १ (Sem - 2) | **प्रश्नपत्रम् - ४** | गुणाः - ७० |
| विषयः - नव्यव्याकरणम् | **कोड - CC 4.2.6** | समयः- ११:०० तः २:०० |
| दिनाङ्कः - २१.४.२०१६ | सन्दर्भग्रन्थः - लघुशब्देन्दुशेखर | |

**प्रथमान्वितिः (युनिट - १)**

**प्रश्नः १ द्वयोरेकस्य व्याख्यानं ससन्दर्भं कुरुत (४)**

(अ) स्त्रीनिष्ठसंख्यायां वर्तमानयोरित्यर्थ इति भावः। नेहेति। त्रिशब्दस्य पुंनपुंसकवृत्तित्वेऽ समुदायस्य स्त्रियां वृत्तेरङ्गविशेषणत्वे आदेशः स्यादिति भावः।

(आ) दस्य ष्टुत्वं डस्य संयोगान्तलोपश्चादेशस्वरूपभङ्गभिया न कृत इति कैयटः। पञ्चभ्यः इत्यधिकव्यवच्छेदाय। अस्य सर्वाद्यन्तर्गणत्वात्।

**प्रश्नः २ यथाग्रन्थम् एकं सूत्रं व्याख्यात (१२)**

(क) अतोऽम्।

(ख) सर्वनाम्नः स्याड्ढ्रस्वश्च।

**प्रश्नः ३ केषाञ्चित् चतुर्णामुत्तराणि लेख्यानि (४)**

(क) एकाच् इत्यस्य पदस्य समासविग्रहं लिखत

(ख) स्वमोः इत्यस्य पदस्य समासविग्रहं लिखत।

(ग) नपुंसकस्य झलचः इति सूत्रस्य आशयंलिखत।

(घ) आङि चापः इति सूत्रस्य आशयं लिखत।

(ङ) रमा इति पदं कस्मात् धातोः सिध्यति?

(च) प्रतिपदोक्तम् इत्यस्य कोऽर्थः?

**द्वितीयान्वितिः (युनिट - २)**

**प्रश्नः ४ द्वयोरेकस्य व्याख्यानं ससन्दर्भं कुरुत (४)**

(अ) धातोरवयवो यो दादिरित्यर्थमुक्त्वा गर्दभायतेरप्रत्यये गर्धबित्यादौ भष्भावाय उत्तरसूत्रे आवश्यकं वैयधिकरण्यमुक्त्वा दुग्धा इति तुव्यपदेशिवद्भावात्सिद्धमिति भाष्ये उक्तम्।

(आ) ननु विधेयविषये उच्चारणार्थानामपित्संज्ञोचिता, अन्यथा तान्तस्य विधानम् इत्यस्याप्यापत्तेः।

**प्रश्नः ५ यथाग्रन्थं किमपि एकं सूत्रं व्याख्यात (१२)**

(क) षट्चतुर्भ्यश्च। (ख) स्कोः संयोगाद्योरन्ते च।

**प्रश्नः ६ केषाञ्चित् चतुर्णामुत्तराणि लेख्यानि (४)**

(क) दादेः इति पदस्य समासविग्रहं प्रदर्शयत।

(ख) प्रियचत्वारः इति पदस्य समासविग्रहं प्रदर्शयत।

(ग) सावनडुहः इति सूत्रस्यार्थं लिखत।

(घ) रोः सुपि इति सूत्रस्यार्थं लिखत

(ङ) वृत्रघ्नः इति पदं परिचिनुत।

(च) व्यपदेशिवद् इत्यस्य कोऽर्थः?

## तृतीयान्वितिः (युनिट - ३)

**प्रश्नः ७ यथेच्छम् एकस्य ससन्दर्भं व्याख्या विधेया** **(४)**

(अ) सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु
वचनेषु च सर्वेषु यन्नव्येति तदव्ययम्॥

(आ)जायन्ते नव सौ तथाऽमि च नव भ्याम्भिस्भ्यसां सङ्गमे
षट्संख्यानि नवैव सुप्यथ जसि त्रीण्येव तद्वच्छसि।
चत्वार्यन्यवचःसु कस्य विबुधाः शब्दस्यरूपाणि तद्
जानन्तु प्रतिभास्ति चेन्निगदितुं षाण्मासिकोऽत्रावधिः॥

**प्रश्नः ८ कस्यचिदेकस्य सूत्रस्य ग्रन्थानुसारिणी व्याख्या विधेया** **(८)**

(क) नहो धः (ख)स्वरादिनिपातमव्ययम्।

**प्रश्नः ९ पञ्चसु केषाञ्चित् त्रयाणाम् उत्तराणि लेख्यानि** **(३)**

(क) यः सौ इति सूत्रस्याशयं लिखत
(ख)स्वमोः इति पदस्य समासविग्रहं लिखत।
(ग) आच्छीनद्योर्नुम् इति सूत्रस्य आशयं लिखत।
(घ) अव-अपि-उपसर्गयोरकारस्य लोपं कः इच्छति?
(ङ) कृन्मेजन्तः इति सूत्रस्य आशयं लिखत

## चतुर्थी अन्वितिः (युनिट – ४)

**प्रश्नः १० कस्यचित् एकस्य ससन्दर्भं ग्रन्थानुसारिणी व्याख्या विधेया** **(४)**

(क) उगिच्छब्देन प्रातिपदिकस्य विशेषणादन्तविधिः। प्रत्ययविधाविति निषेधस्तु न उगिद्वर्णग्रहणवर्नमित्युक्तेः तदाह उगिदन्तादिति।

(ख)न ङीबिति। यम् अनः इति च उक्तरीत्या टाब्ङीपोरुभयोरपि निषेधः। एतेन समीभ्यां बहुयज्वभ्यां बहघीवरीभ्यामित्यत्र डाब्ङीपोरभावे नलोपे टाब् दुर्वार इत्यपास्तम्

**प्रश्नः ११ कस्यचित् एकस्य सूत्रस्य शेखरानुसारि व्याख्यानं विधेयम्** **(८)**

(क) उगितश्च। (ख) डाबुभाभ्यामन्यतरस्याम्

**प्रश्नः १२ पञ्चसु केषाञ्चित् त्रयाणाम् उत्तराणि लेख्यानि** **(३)**

(क) बहुयज्वा इत्यस्य समासस्य विग्रहं प्रदर्शयत।
(ख) बहुधीवराः इत्यस्य समासस्य विग्रहं प्रदर्शयत।
(ग) मनः इति सूत्रस्य आशयं लिखत।
(घ) अजाद्यतष्टाप् इति सूत्रस्य आशयं लिखत।
(ङ) पञ्चाजी इत्यस्य समासस्य विग्रहं प्रदर्शयत।

***